International Journal of Applied Research 2022; 8(5): 310-314



International Journal of Applied Research

**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 8.4
IJAR 2022; 8(5): 310-314
www.allresearchjournal.com
Received: 05-03-2022
Accepted: 06-04-2022

डॉ. सन्तोष कुमार झा
सहायकाचार्य, बालाजी कॉलेज ऑफ एजुकेशन, फरीदाबाद, हरियाणा, भारत

**Corresponding Author:**
डॉ. सन्तोष कुमार झा
सहायकाचार्य, बालाजी कॉलेज ऑफ एजुकेशन, फरीदाबाद, हरियाणा, भारत

# शिक्षाशास्त्रे नैतिकशिक्षा

डॉ. सन्तोष कुमार झा

सारांश
पुराकाले अस्माकं देशे गुरुकुलमासीत्। विद्यालयविहीना पाठशाला आसीत्। अनुभवे नीत्यनुगुणं प्रापयति स्म। तत्र मातापितुः संस्कारोऽपि तान् पूर्वं प्रापयन्ति स्म। तावेव ते गुरुकृपया क्रियान्वितं विकसितं च कुर्वन्ति स्म। रुच्यानुगुणं ते विविधेषु विषयेषु उन्मुखं भूत्वा सत्यान्वेषणं ज्ञानस्य परिष्कारञ्च कुर्वन्ति स्म। परं वैदेशिकशिक्षापद्धतयः व्यर्थप्रमाणिता जाता। अत्र स्वदेशे अस्याः शिक्षायाः हीनता विदेशे च उच्चता भावस्य जागरणं जातम्। तेनैव आधुनिकी शिक्षा मानवान् नैतिकविषये विमुखं करोति। एतत्सर्वं शिक्षापद्धतौ नैतिकताया अभावकारणात् जातमित्येव लक्षयति। मातापितरौ एव बालकानां प्रथमो गुरुः यस्य प्रथमशिक्षा गृहे एव संस्कारस्य शिक्षा दातव्यम्। परं मातापितरो एव संस्काराभावः आदर्शजीवने कर्माभावाश्च। सम्प्रति आदर्शः नैतिकता च कुत्राऽपि नैव वर्तन्ते। धर्मः जनानां कृते वञ्चना इव। ते जीवने विज्ञानजनितयान्त्रिकर्ता अर्थप्रवृत्तिजीवनक्रमञ्च स्वीकुर्वन्ति। अतः एतस्यां परिस्थितौ आधुनिकसन्दर्भे नैतिकशिक्षा एव उपादेयो भवति। अतोऽत्र नैतिकनाम किम्? तस्य लक्षणानि, परिभाषा तथा च कस्मै कृते आवश्यकमित्यादीनां विमर्शोऽस्मिन् शोधपत्रे अग्रे भविष्यतीति शम्।

कूट्शाब्द : नैतिकता, तार्किकता, आयोगः, शिक्षापद्धतिः, मनोविज्ञानञ्चेति।

## प्रस्तावना

शिक्षया समाजे परिवर्तनस्यार्थोऽस्ति सामाजिकगतिशीलता। यदि एवं प्रकारोऽस्य परिवर्तनं न स्यात् उत प्रभावहीनता भवति, तर्हि समाजस्य गतिशीलता कैश्चितकारणैः विकासश्च अवरुध्यते। एतादृश्यामवस्थायां सामाजिकव्यवस्था समाप्ते सति तत्र अराजकता समुत्पद्यते यस्यार्थः सामान्यतया दासतायाः अभिशापरूपेण प्रकटीभवति। समाजे जाड्यता जाते सति व्यक्तिः परिस्थित्यधीना भवति। तस्य विचारशक्तिः क्षीणा भवति तथा च सामाजिकजीवनं रूढिवादी निष्क्रियञ्च प्राप्नुते। वास्तविके परिस्थितिरेषा भयावहा।

मानवनिर्माणे समाजस्य सर्वाधिकं महत्त्वपूर्णं योगदानं भवति। समान- भौतिकसाधनसम्पन्ने सत्यपि यदि कश्चिज्जनो विद्यालयेन साकं सम्पर्कं न स्थापयति तर्हि तस्य विकासो नैव भवति, स पशुवत् तिष्ठते। समाज एव व्यक्तेः शरीरस्य मस्तिष्कस्य व्यक्तित्वस्य चान्यानङ्गान् विकसति। अद्यस्तनस्य विकसित- व्यक्तिः कोटिवर्षाणां सामाजिकगतिशीलतायाः परिणामोऽस्ति। भारतीयसमाजेन स्वतन्त्रतायाः पूर्वं शताब्दपर्यन्तं सामाजिकगतिहीनतायाः भयावहपरिस्थितेः प्रत्यक्षमनुभवमनुभूतम्। स उन्नतिं न प्राप्नोति अपितु अवनतिमेव तथा चैवं प्रकारेण तस्य व्यक्तित्वं कुण्ठितमभवत्। अतोऽस्य प्रत्यक्षप्रमाणमस्ति यत् समाज एव व्यक्तेः व्यक्तित्वस्य निर्माता भवति, सामाजिकगतिशीलता तस्य विकसनं परिमार्जनञ्च करोति।

भारतीयसमाजस्य निष्क्रियता एकाऽन्या विशेषतापि दृष्टिपथमायाति। शिक्षायाः याः काश्चन व्यवस्थाः उपलब्धा अपि आसन् ताः अपि सामाजिक- गतिशीलतामानेतुं केनापि प्रयत्नं न अकुर्वन्। प्रमुखकारणमस्यास्ति पाश्चात्य- सामाजिक तथा परिस्थितित्याधारितशिक्षापद्धतिः भारतीयवातावरणस्यानुकूलं नैवासीत्। अतः न तु अनया भारतीयसमाजे गतिशीलता जाता नहि सामान्य- भारतीयजनता प्रभाविता कृता। अस्य प्रभावं केवलमुच्चवर्गाणां जनानामुपरि एव सीमितोऽभवत् अतस्ते एव अनया लाभान्विताः अभवन्।

आङ्ग्लप्रशासका: आङ्ग्लशिक्षापद्धत्या शिक्षाप्रदानस्य व्यवस्था भातीयसमाजस्य शिक्षासम्बन्धिनाम् आवश्यकतानां पूर्त्यर्थं न कृवतन्त: अपितु स्वकीयप्रशासनसम्बन्ध्यावश्यकतानां पूर्त्यर्थं कृतवन्त:। सा शिक्षापद्धति: विकसिता पद्धतिरासीत् तथा च तस्यामाधु-निकतमशिक्षा, साहित्यं, विज्ञानं, संस्कृतिसम्बन्धिज्ञानस्य च समावेश: आसीत्। अतोऽस्य प्रभावस्वरूपेण समाजस्यैकविशेषवर्गे जागरूकताऽगता तेषु केचन देशभक्तजना: सामाजिकविकासस्य तत्कालीनपरिस्थितीनामध्ययनं कृतवन्त:। सन्दर्भेऽस्मिन् राजाराममोहनरायमहोदयानां नाम विशेषोल्लेखनीयोऽस्ति। अनेन सामाजिकसमस्यानामध्ययनं कृत्वा निष्कर्ष: प्रदत्त: यत् प्राचीनशिक्षापद्धति: पूर्णत: समाजोन्नयनार्थमसमर्था तथा च काचित् विकसितशिक्षापद्धतिरेव समाजोन्नयनं कर्तुं शक्नोति। अतस्तै: कस्याश्चित् अन्यव्यवस्थाया: अभावे आङ्ग्लशिक्षापद्धते: प्रचार: कृत:। केचन धनवन्त: शिक्षाप्रेमिणश्च शिक्षासंस्थानां स्थापनां कृतवन्त:। आङ्ग्लसर्वकारेणापि किञ्चित् स्वार्थाय भारतीयानां सन्तुष्टयै च शिक्षाव्यवस्था: प्रकल्पिता:। महात्मागान्धिन: आह्वाहने सामाजिकपुनरुत्थानस्य प्रयत्न: प्रारम्भ: जाता:। कारणेनानेन समाजे जागृतिरभवत् अन्ततोगत्वा च भारतं स्वतन्त्रं बभूव। एता: सर्वा: परिस्थितयो घटनाश्च प्रत्यक्षप्रमाणरूपेण सन्ति यत् गतिशीलताद्वारा समाजस्य विकासो भवति तथा च सामाजिकगतिशीलतामानयनार्थं सर्वेभ्य: प्रभावशालीसाधनमेका विकसितशिक्षाव्यवस्था वर्तते।

नैतिकनिर्णय

प्राचीनकाले भारतीयविद्वांस: मन्यन्ते यत् सुनैतिकभावनासच्चरित्रयो: अभावे सति बौद्धिकोपलब्धे: महत्त्वं नैव विद्यते। तेषां मतमिदं संसारे सदाचार एव सर्वोत्तमम्। तद्यथा-

आचार: प्रथमो धर्म: श्रुत्युक्त: स्मृतिरैव च।
तस्मात् रक्षेत् सदाचार: प्राणेभ्योऽपि विशेषत:।।

मनुस्मृतौ उक्तमस्ति यदि कश्चिद् पुरुष: अल्पज्ञ: अस्ति। परं स सदाचारी अस्ति तर्हि स: दुराचारिणो विदुषश्रेष्ठो भवति। तथाहि-

सावित्रीमात्रसारोऽपि वरं विप्र सुयंत्रित:।
नायन्त्रितस्त्रिवेदोऽपि सर्वांशी सर्वविक्रय:।।

शिक्षा छात्रान् भविष्ये आगतानां समस्यानां निर्मूलनार्थं तेषां विश्लेषणं निर्णयञ्च कर्तुं प्रशिक्षणं नैव प्रददाति तर्हि सा शिक्षा महत्त्वपूर्णोद्देश्यं तिरस्करोति। प्राचीनभारतीयसंस्कृतौ मूल्यं चतुर्षु पुरुषार्थेषु स्वीकृतम् वर्तते। धर्मोऽर्थ: काम: मोक्षश्च। तत्र धर्म: स्वीयेऽसङ्ख्यगुणानां समन्वय:। अस्य प्रतिपादनमुक्तरूपेण कृतमस्ति।

धृति: क्षमादमोऽस्तेयं शौचमिन्द्रियनिग्रह:।
धीर्विद्यासत्यमक्रोधो दशकं धर्मलक्षणम्।।[1]

राष्ट्रपितामहात्मागान्धिरपि नैतिकमूल्ये सत्य-अहिंसा-सत्याग्रह-ब्रह्मचर्य: अस्तेय: एते अन्तर्भवन्ति अपि च बौद्धधर्मेऽष्टाङ्गमार्गेण नैतिकमूल्यानां सम्पोषणं भवति स्म। जैनधर्मे नैतिकमूल्ये अहिंसा शान्ति-सदाचारशाकाहार एते समायाति। तथैव ईसाईधर्मेऽपि सत्याहिंसाक्षमापरहितमित्यादय अत्र स्वीकृतमस्ति। तेन सामाजिकशान्ते: परिकल्पना कर्तुं शक्यते। ईस्लामधर्मेऽपि सत्याहिंसाक्षमा-रहितमित्यादय अत्र स्वीकृतमस्ति। तेन सामाजिकशान्ते: परिकल्पना कर्तुं शक्यते। ईस्लामधर्मेऽपि भ्रातृत्वभावनाया: समत्वभावनाश्च सन्देशं ददाति। विश्वस्य प्रत्येकं धर्म: सृष्टे: आधार: सार्वभौमिकं नैतिकमूल्यञ्च स्वीकरोति।

शिक्षा मनुष्ये मानवतां योजयति तथा च तं सुनागरिकाराष्ट्रियभावनाभि: सह योजयित्वा देशसेवकं निर्माति। भारतीयसंस्कृतौ नीति: मूलमासीत्। यस्मिन् जीवनस्य भवनम् अवस्थितमासीत्। तेनैव कारणेन नीतियुक्तासंस्कारजन्या: शिक्षया जना: सुखिन: आसन्। तदर्थं ते लोकं परलोकञ्च संश्चयन्ति स्म। परन्तु सम्प्रति तद्विपरीतास्थिति वर्तते। पुरा जीवनस्य प्रत्येकं क्रियाकलापे नैतिकताया: मापदण्डासीत्। मनुज: मृत्युं प्राप्य अमरत्वं प्रापयति स्म। आधुनिकपरिप्रेक्ष्ये तन्नैतिकस्वरूपस्य पुनरुद्धारस्य महती आवश्यकता वर्तते। आधुनिकशिक्षा अस्मान् सुनागरिकं न निर्माति अत्र मूले नैतिकताया अभावो वर्तते।

पुराकाले अस्माकं देशे गुरुकुलमासीत्। विद्यालयविहीना पाठशाला आसीत्। अनुभवे नीत्यनुगुणं प्रापयति स्म। तत्र मातापितु: संस्कारोऽपि तान् पूर्वं प्रापयन्ति स्म। तावेव ते गुरुकृपया क्रियान्वितं विकसितं च कुर्वन्ति स्म। रुच्यानुगुणं ते विविधेषु विषयेषु उन्मुखं भूत्वा सत्यान्वेषणं ज्ञानस्य परिष्कारञ्च कुर्वन्ति स्म। परं वैदेशिकशिक्षापद्धतय: व्यर्थप्रमाणिता जाता। अत्र स्वदेशे अस्या: शिक्षाया: हीनता विदेशे च उच्चता भावस्य जागरणं जातम्। तेनैव आधुनिकी शिक्षा मानवान् नैतिकविषये विमुखं करोति। एतत्सर्वं शिक्षापद्धतौ नैतिकताया अभावकारणात् जातमित्येव लक्षयति।

आधुनिकपरिप्रेक्ष्ये बहव: छात्रा: शिक्षितजनाश्च लोकव्यवहारात् अपरिचिता: सन्ति। सर्वत्र तेषां अनुभवहीनज्ञानम् अपूर्णशिक्षा संस्कार-रहिताचरणञ्च दृष्टिगोचरो भवति। आधुनिकशिक्षा सिद्धान्तेषु आधारिता वर्तते या जगज्जीवनयो: तादात्मयस्थापितं नैव कर्तुं शक्नोति। मातापितरौ एव बालकानां प्रथमो गुरु: यस्य प्रथमशिक्षा गृहे एव संस्कारस्य शिक्षा दातव्यम्। परं मातापितरो एव संस्काराभाव: आदर्शजीवने कर्मोभावाश्च। सम्प्रति आदर्श: नैतिकता च कुत्राऽपि नैव वर्तन्ते। धर्म: जनानां कृते वञ्चना इव। ते जीवने विज्ञानजनितयान्त्रिकर्ता अर्थप्रवृत्तिजीवनक्रमञ्च स्वीकुर्वन्ति। अत: एतस्यां परिस्थितौ आधुनिकसन्दर्भे नैतिकशिक्षा एव उपादेयो भवति। गुरुकुलानां स्वस्थपरम्परात: शान्तिनिकेतनपर्यन्तं सर्वमपि मानवान् नैतिकशिक्षा एव प्रददाति। अस्माकं देशे मानसिकशारीरिकशिक्षयो: अतिरिक्तम् आत्मशिक्षोपरि अधिकमवधानं प्रदत्तम्। य: अस्मात् अन्येभ्यो देशेभ्यो पृथक् करोति। सम्प्रति अस्या आवश्यकताया एव आधुनिकसन्दर्भे नवीनसन्दर्भे च मूल्याङ्कनमावश्यकं वर्तते। मानवताया: पृष्ठभूमौ अनुकूलशिक्षा एव अस्मान् विकसयति। नैतिकशिक्षाया: अभावे आत्मिकोन्नति: नैव भवितुमर्हति तथा च मानव: पूर्णरूपेण विकासपथि नैव अग्रसरन्ति। अस्मिन् सन्दर्भे राष्ट्रिय शिक्षा आयोग: (1964-66) विद्यालयीय पाठ्यक्रमे प्रमुखो दोष: वर्तते

[1] मनुस्मृति: 6/92

अत्र सामाजिकनैतिक-आध्यात्मिकमूल्यशिक्षाया अनुपस्थिति:। यदि वयं स्वशिक्षा- संस्थाभ्य: नैतिकशिक्षा-आध्यात्मिकप्रशिक्षणञ्च पृथक्कुर्म: तर्हि वयं ऐतिहासिक- विकासस्य कार्यं कुर्म:।

ऋषि मुनि: तत्त्ववेत्तार: दार्शनिकाश्च शताब्दिभ्यो एतादृश: मार्गाणामन्वेषिण आसन् यस्योपरि मानवता निर्द्वन्द्वतया च निर्भीकरूपेण प्रचलति। शताब्दिभ्यो मानवानां समक्षे यदि सर्वश्रेष्ठं किमपि मानकमूल्यमस्ति सोऽस्ति 'सत्यम्'। सत्येन सह निबन्धिति अपरतथ्यमस्ति 'लोकल्याणस्य भावना' तथा च तृतीयोऽस्ति 'सौन्दर्यताया साधना' सूत्ररूपे यदि चेत् निगद्यते तु 'सत्य शिवं सुन्दरम्' मानवताया: महामूल्यमस्ति।

कश्चिदऽपि व्यक्ते: व्यवहार: तस्य मूल्यस्य प्रतिबिम्बो भवति। मूल्यविहीन जीवनं अर्थहीनं जीवनानां समो वर्तते। मूल्यनिर्माणे समाजस्य महती भूमिका आवश्यकी अत एव अनेके विद्वांस: समाजमेकं नैतिकशक्ति: मन्यते। नैतिकशिक्षां विना शिक्षणप्रक्रियैव अर्थहीना तथा च अप्रासांगिको भविष्यति। इदमेव लक्ष्यं निर्धार्य 12 सितम्बर 2002 तमे वर्षे सर्वोच्चन्यायालयेन स्व ऐतिहासिक निर्णये शिक्षां नैतिकमूल्यसम्बन्धी समयस्य आवश्यकतारूपे प्रतिपादित:।

महान्दार्शनिकप्लेटोमहोदय: शिक्षां परिभाषयन्त: - 'शिक्षाया अभिप्रायो तेन प्रशिक्षणेन वर्तते य: शिक्षया कौशलद्वारा बालकेषु शोभना नैतिकताया: विकासं करोति।

राष्ट्रपितामहात्मागान्धीमहोदयस्य शब्देषु - शिक्षाया: सम्पूर्णकार्यं एकैव शब्दे प्रकट्यते तथा च स शब्दोऽस्ति 'नैतिकता।' अर्थात् नैतिकता नैतिकशिक्षा वा तत् आधारभूततत्त्वमस्ति यं विना शिक्षा अपूर्णा स्यात्।

सर्वपल्ली डॉ. राधाकृष्णन्महोदयशब्देषु भारतसमेत्य सम्पूर्णसंसारस्य पीड़ाया: कारणमिदमस्ति यत् शिक्षाया: केवलं मस्तिष्कस्य विकासेन सह वर्तते। यदि चेत् शिक्षणस्य अर्थ: हृदय आत्मायाश्च तिरस्कारेण सह अस्ति तर्हि तं पूर्ण न मन्यते।

हरवर्टमहोदयानुसारेण नैतिकतां सार्वभौमिकरूपेण मनुष्यताया: उच्चतमोद्देश्यं मन्यते। नैतिक विकासैव शिक्षाया: उद्देश्यमस्ति। शिक्षाया: कार्य बालके उत्तमनैतिकचरित्रस्य विकासोऽस्ति।

हरवर्ट महोदयस्य कथनं यदि चेत् जॉनस्तुअर्टमिलमहोदयस्य वार्ताभि: नियोज्य दर्शयत् तर्हि स्थिति अतिस्पष्टो भविष्यति। तस्य कथनमस्ति यत् आनन्दं सुखं वा वर्द्धनमेव नैतिकमूल्यानां श्रेष्ठतमं कार्यमस्ति।

जी ई मूरेमहोदयानुसारेण सत्यं सत्यमस्ति, शिवमस्ति, तथा च सुन्दरं सुन्दरमस्ति सत्यं शिवं सुन्दरमेव नैतिकताया: चरमोत्कर्षो वर्तते। यं परिभाषयतुिं न शक्यते।

प्रो. एल. डी. क्रो. एलिस क्रो. अनुसारेण चारित्रिकनैतिकनीतिशास्त्रीयो वा मूल्यै: सह निश्चयरूपेण साहचर्य विद्धाति। चरित्रनिर्माणं मूल्यानां महत्त्वपूर्णं स्थानमस्ति। तथा च एते मानवमूल्यं जीवनं नैतिककर्तुं शक्यते।

स्वयुगस्य दार्शनिकचिन्तक: तथा च साहित्यस्रष्टा विश्वकवि रवीन्द्रनाथ- टैगोरमहाभागेन नैतिकताया: सम्बन्धे निगदितम् - मनुष्यस्य जीवनमनैतिक भवितुमर्हति परञ्च नैतिकताशून्या न भविष्यति। तस्य नैतिकाधार: आवश्यकमेव।

अनेन प्रकारेण नैतिकताया: परिप्रेक्ष्ये स्पष्टमस्ति यत् कश्चिदपि मनुष्ये नैतिकता नारोप्यते। नैतिकता स्वयमेव उत्पद्यते। अस्माकं मस्तिष्के स्थापितरेष्ठासम्बन्धो वर्तते। यां मया सर्वे व्यवहारे तथा च कार्ये परिदृश्यते अभिव्यज्यते च।

निष्कर्षत: कथितुं शक्यते यत् नैतिकशिक्षोद्देश्यपूर्णा विमुक्तकारी तथा च जीवनदायिनी स्यात् आत्मनियन्त्रणस्य प्रबोधिनी स्यात् अथ च एकनिष्ठा तथा च सत्यमार्गान्वेषिणो स्यात् एतादृशी शिक्षां वयं नैतिक शिक्षां कथितुं शक्नुम:।

### नैतिकशिक्षाक्षेत्रे किञ्चित् प्रयास विश्वविद्यालयशिक्षाऽऽयोग: (1948-49)

विश्वविद्यालयशिक्षायोग:, यस्य सङ्घठनं सर्वपल्लीराधाकृष्णनस्य अध्यक्षतायामभवन्। स मूल्याधारितशिक्षां सर्वोत्तममुद्घोषयन्त:। वयं वास्तविक- स्वतन्त्रताया: संरक्षणं तावत् न कर्तुं शक्नुम: यावद् वयं लोकतन्त्रन्यायस्वतन्त्रता- समानताबन्धुत्वादीनाञ्च मूल्यस्य सरक्षणं न करिष्यामि। शिक्षाया: उद्देश्यं शिक्षार्थीणां नैतिकाध्यात्मिकश्च विकासोऽस्ति।

### माध्यमिकशिक्षाऽऽयोग: (1952-53)

आयोगेन उद्घोषित: यत् नैतिकमूल्यं शिक्षाया आधारनिर्माण करोति। आयोगेन अस्मिन् सन्दर्भे कथितं यत् भारत एक स्वतन्त्रराज्यमस्ति अस्योद्देश्यं वर्तते धर्मनिरपेक्षगणतन्त्रस्य प्रतिष्ठापनम्। अतो शिक्षाया एतेषां नागरिकानां निर्माणकरणीयमस्ति येषु वैचारिकस्वच्छता सामाजिकताया: अनुशासनं सहयोगं सहिष्णुता एकनिष्ठदेशभक्तिविश्वनागरिकतायाश्च भावना स्यात्।

### धार्मिकनैतिकशिक्षासमिति: (1959)

भारतसर्वकारेण अगस्त 1959 तमे वर्षे श्रीप्रकाशमहोदयस्य अध्यक्षतायां धार्मिकनैतिकशिक्षा समित्याश्च नियुक्तवान्। इयं समिति: जनवरी 1960 तमे वर्षे स्व संक्षिप्तिका सर्वकारस्य समक्षे प्रस्तुतमकरोत्। अस्या: समित्या: चिन्तनं वर्तते यत् साम्प्रतिकस्य शिक्षाया अनेकेषां दोषाणां कारणं वर्तते धार्मिक- नैतिकशिक्षायाश्च उपेक्षा। बालकान् सच्चरित्रवान् कुशलनागरिश्च निर्मातुं नैतिकमूल्यानां शिक्षा आवश्यकी वर्तते।

### राष्ट्रियशिक्षाऽऽयोग: (1964-66)

राष्ट्रियशिक्षायोगानुसारेण शिक्षाया: प्रमुखोद्देश्यं वर्तते। नैतिकाध्यात्मिकश्च मूल्यानां शिक्षा वर्तते। आयोगस्य चिन्तनमस्ति यत् धर्ममेकं महान् प्रेरक शक्ति वर्तते। नैतिकमूल्यानामाकलनस्य चरित्रनिर्माणस्य च सा एव आधार: वर्तते।

अतो धर्मानां नैतिकशिक्षाभि: सामाजिक-नैतिक-आध्यात्मिकमूल्यानाञ्च शिक्षा प्रदानस्य संगठिप्रयासो करणीयम्।

आयोगेन स्वीक्रियते यत् विद्यालयपाठ्यक्रमे एक: गम्भीर: दोषोस्ति सामाजिकं नैतिकमाध्यात्मिक मूल्यानाम् अनुपस्थिति:। यदि चेत् वयं स्व शिक्षासंस्थानै: नैतिक शिक्षा तथा च आध्यात्मिकप्रशिक्षणम् नि:सारयाम: तर्हि स्वसम्पूर्ण-ऐतिहासिक विकासस्य विरुद्धे कार्यं कुर्म:।

राष्ट्रियशिक्षानीतिः (1986)

1986 तमे वर्षे राष्ट्रियशिक्षानीत्यान्तर्गते समाजे मूलभूतमूल्यानां ह्रासः तथा च बद्धानाम् अनास्थानामुपरि चिन्तां प्रकटितः। अस्यां शिक्षां नैतिकमूल्यानां विकासस्य एकाशक्तिशाली साधनरूपत्वेन निर्माणाय पाठ्यचर्यायां समायोजनस्य आवश्यकतोपरि बलं दत्तमस्ति। अस्यां कथितमस्ति यत् शिक्षां कर्त्तव्यं भवेत् यत् अस्माकं जनताया एकता अखण्डतायाश्च हिते सार्वभौमशाश्वतमूल्यानाञ्च विकासं कारयेत्।

आचार्यराममूर्तिसमितिः (1990)

अनया समित्या 1986 तमे वर्षस्य राष्ट्रिय शिक्षा नीतेः समीक्षां समीक्षितः उद्घोषितश्च यत् समाजस्य उन्नतये नैतिकामूल्यमावश्यकं वर्तते। तथा च नैतिक मूल्यानां पतनं प्रति चिन्तामपि प्रकटितः। स कथितं यत् यदि चेत् शिक्षाप्रक्रियायां नैतिकतायाः समावेशो न स्यात् तर्हि शिक्षा स्वान्तनिहित उपादेयतामेव नष्टयति।

यशपालसमितिः (1997)

अनया समित्या राष्ट्रिय शिक्षा नीतेः मार्गमनुसृत्य लिखितवान्। यत् प्रत्येकं विद्यालयं समेषु बालकेषु किञ्चित् आवश्यकागुणानां विकासं करणाय व्यवस्थित प्रयासं कारयेत्। बालकेषु नियमितताः, समयनिष्ठतायाश्च, स्वच्छता, कर्मठता कर्त्तव्य सेवायाः भावना, समानता, सहकारिता, उत्तरदायित्वस्य भावना सत्यनिष्ठता राष्ट्रियतादात्म्यगुणादीनाञ्च विकासः कृत्वैव व्यक्तिगतसामाजिक-राष्ट्रियविकासेषु च योगदानं भविष्यति।

राष्ट्रियपाठ्यचर्यायाः प्रारूपम् (2005)

राष्ट्रियपाठ्यचर्याप्रारूपस्य निर्माणं एन.सी.ई.आर.टी. द्वारा अभूत। अस्यां नैतिक मूल्यसम्बन्धिविभिन्नानि तत्त्वानि सन्ति। स्वतन्त्रता प्राप्त्यानन्तरं गत पञ्चदशकेभ्यो आवश्यक नैतिकमूल्यानां गुणानाञ्च निरन्तरं ह्रासः परिदृश्यते। मूल्याधारित शिक्षा एनं देशं सर्वशः कट्टरता-दुर्भावना-हिंसा-भाग्यवाद- भ्रष्टाचारादयः प्रभृतयः दुष्टप्रवृत्तिभ्यो संघर्षे सहयोगं प्रदास्यति। एतदतिरिक्तं विद्यालयस्याऽपि कर्त्तव्यो भवेत् यत् स किञ्चित् महत्त्वपूर्णगुणानां विकासं कारयेत्। यथा - नियमितता-समयप्रतिबद्धता-स्वच्छता-परिश्रमशीलता-कर्त्तव्य-परायणता-उत्तरदायित्वस्य भावना, राष्ट्रियाध्ययात्मिकमूल्यानाञ्च सम्मानसत्य-प्रियतायाः समावेशश्च। तस्य निरन्तरोपरि विशेषबलं भविष्यति। अस्मिन् प्रारूपे अयमपि उद्घोषितं यत् व्यक्तिगतसामाजिकाध्यात्मिकनैतिकराष्ट्रियमूल्यानाञ्च सहवर्तीगुणानां विकासं कारयेत्। यः किमपि व्यक्तिं मानवीयसामाजिकरूपेण च प्रभावेन प्रभावयति तथा च जीवनं सार्थकतां दिशाञ्च दिशति।

नैतिकतायाः स्वरूपम्

प्रत्येकसमाजे शान्तिव्यवस्थां संस्थापयितुमेकां विशिष्टाचारपद्धतिः शनैः शनैः एकं सुस्पष्टं सुनिश्चिताश्च व्यवस्थायाः रूपं धारयति। तदा नैतिकतायाः स्थानं प्रदीयते इयमेका एतादृशि व्यवस्था वर्तते। यथा समाजस्य सदस्याः परस्परे सम्मील्य परेषां हितं धारयन्तः निवसन्तिस्म। नैतिकतां त्रिधा विभज्यतुं शक्यते सार्वभौमिकनैतिकता, सामाजिकनैतिकता, वैयक्तिकनैतिकताश्च। भारतीय मनीषिणः मानवमात्रस्य कामना कुर्वन्तः उद्घोषिताः -

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत्।।

मानववादस्य व्याख्या कुर्वन्तः एनांमानवप्राणिवादस्य सारांशः प्रदत्तः। अस्यार्थोऽस्ति मानवमात्रस्य हितस्य चिन्तनं पुनश्चासौ मानवः स मानवः यत्र कुत्रापि वसति एवञ्च कश्चिदपि वर्गस्य कथं न स्यात्। मानवमात्रस्य कल्याणोपर्याधारितमूलनैतिकतामानववादश्च एकैवादर्शस्य उभौ रूपौ स्तः यः समाजस्य हिताय अत्यावश्यकोऽस्ति।

मूलनैतिकतायाः चरमलक्ष्यो वर्तते-मानवतायाः कल्याणं एवञ्च मानसिकनैतिकताऽपि समाजविशेषस्य कल्याणं सर्वोपरि मन्यते। सामाजिक नैतिकतायाः लक्ष्यमस्ति। समाजे व्यवस्थां जननं तथा च सामाजिकजीवनम् अक्षुण्णरूपे स्थापनं येन समाजस्यान्तर्गत-प्रत्येकव्यक्तिः एक-द्वितीयस्य साहाय्यं प्रापयेत्। अस्य लक्ष्यस्य पूर्त्तये सामाजिकनैतिकनियमानां बन्धनानां कर्त्तव्यानाञ्च योजनां योजयति। कालान्तरे अयमेव कर्त्तव्यनियमाश्च सामाजिकनैतिकतायाः प्रत्यक्ष एवञ्च सर्वस्वीकृतरूपं विदधाति।

त्रिविधरूपात्मिका नैतिकता वैयक्तिकनैतिकता सामाजिकनैतिकता सार्वभौमिकनैतिकतायाञ्च मूलनैतिकतायाः स्वरूपोऽयं स्थिरशाश्वतश्चास्ति। मूलनैतिकताया आदर्शेषु कर्त्तव्यभेदेषु च स्थानभेदो परिस्थितिभेदस्य वा कारणेन कश्चिदन्तरं नोपद्यते। अतैव मूलनैतिकतायाः सहैव सार्वकालिकोऽप्याधारित। अस्याः सम्बन्धः सम्पूर्णमानवतया सह वर्तते। मानवतायाः कश्चिद् अङ्गं विशेषणं ना मूलनैतिकतायाः लक्ष्यं व्यापकोऽस्ति।

निष्कर्षरूपे नैतिकतायाः स्वरूपं यं भिन्नपरिदृश्यते स बाह्यमस्ति, आन्तरिकरूपे साम्योस्ति। नैतिकताया एकमेव उद्देश्यमस्ति अव्यवस्थान्संघर्ष- असहयोगाञ्च दूरीकरणं मानवजीवने व्यवस्थासहयोगसामञ्जस्यञ्चोत्पादनम्।

सारांशरूपे अयं वक्तुं शक्यते यत् नैतिकता मानवजीवने सामञ्जस्य सहयोग उन्नयानाञ्च सम्भाविनो एको आचारपद्धतिः वर्तते। इति शम्।

सन्दर्भ ग्रन्थाः


1. गुप्ता, एस. पी. सांख्यिकीय विधियाँ, शारदा पुस्तकभवन, इलाहाबाद, 1994.
2. गैरेट हेनरी ई.: शिक्षा और मनोविज्ञान में सांख्यिकी, कल्याणी पब्लिशर्स, 1956.
3. नागेन्द्रः (संपादक) मानवीकि पारिभाषिक कोश (मनोविज्ञान खण्ड), राजकमल प्रकाशन, दिल्ली, 1968.
4. पाठक, पी. डी.: शिक्षा मनोविज्ञान, विनोद पुस्तक मन्दिर आगरा, संस्करण 33
5. पाण्डेय, के. पी.: नवीन शिक्षा मनोविज्ञान, विश्वविद्यालय प्रकाशन, वाराणसी, 2007.

6. मंगल, एस. के.: शिक्षा मनोविज्ञान, प्रकाश ब्रदर्स, लुधियाना, 1984.
7. माथुर, एस. एस.: शिक्षा मनोविज्ञान, विनोद पुस्तक मन्दिर आगरा, 1997.
8. शर्मा, आर. ए.: शिक्षा अनुसन्धान के मूल तत्त्व और शोध प्रक्रिया, लायल बुक डिपो, मेरठ, 2002.